# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

## अध्याय ८९

तदावसाने यज्ञस्य रामः परमदुर्मनाः ।
अपश्यमानो वैदेहीं मेने शून्यमिदं जगत् ।
शोकेन परमायत्तो न शान्तिं मनसागमत् ॥ १॥

विसृज्य पार्थिवान्सर्वानृक्षवानरराक्षसान् ।
जनौघं ब्रह्ममुख्यानां वित्तपूर्णं व्यसर्जयत् ॥ २॥

ततो विसृज्य तान्सर्वान्रामो राजीवलोचनः ।
हृदि कृत्वा तदा सीतामयोध्यां प्रविवेश सः ॥ ३॥

न सीतायाः परां भार्यां वव्रे स रघुनन्दनः ।
यज्ञे यज्ञे च पत्न्यर्थं जानकी काञ्चनी भवत् ॥ ४॥

दशवर्षसहस्राणि वाजिमेधमुपाकरोत् ।
वाजपेयान्दशगुणांस्तथा बहुसुवर्णकान् ॥ ५॥

अग्निष्टोमातिरात्राभ्यां गोसवैश्च महाधनैः ।
ईजे क्रतुभिरन्यैश्च स श्रीमानाप्तदक्षिणैः ॥ ६॥

एवं स कालः सुमहान्राज्यस्थस्य महात्मनः ।
धर्मे प्रयतमानस्य व्यतीयाद्राघवस्य तु ॥ ७॥

ऋक्षवानररक्षांसि स्थिता रामस्य शासने ।
अनुरज्यन्ति राजानो अहन्यहनि राघवम् ॥ ८॥

काले वर्षति पर्जन्यः सुभिक्षं विमला दिशः ।
हृष्टपुष्टजनाकीर्णं पुरं जनपदस्तथा ॥ ९॥

नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तदा ।
नाधर्मश्चाभवत्कश्चिद्रामे राज्यं प्रशासति ॥ १०॥

अथ दीर्घस्य कालस्य राममाता यशस्विनी ।
पुत्रपौत्रैः परिवृता कालधर्ममुपागमत् ॥ ११॥

अन्वियाय सुमित्रापि कैकेयी च यशस्विनी ।
धर्मं कृत्वा बहुविधं त्रिदिवे पर्यवस्थिता ॥ १२॥

सर्वाः प्रतिष्ठिताः स्वर्गे राज्ञा दशरथेन च ।
समागता महाभागाः सह धर्मं च लेभिरे ॥ १३॥

तासां रामो महादानं काले काले प्रयच्छति ।
मातॄणामविशेषेण ब्राह्मणेषु तपस्विषु ॥ १४॥

पित्र्याणि बहुरत्नानि यज्ञान्परमदुस्तरान् ।
चकार रामो धर्मात्मा पितॄन्देवान्विवर्धयन् ॥ १५॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com